CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अश्रूपहारः



ऋष्यशृङ्गमुनिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऋष्यशृङ्गाश्रमग्रन्थमालायाः प्रथमं प्रसूनम्

अश्रूपहारः

उपहर्ता
ऋष्यशृङ्गमुनि :
रेसुङ्गा, गुल्मी

लुम्बिनी अञ्चल' नेपाल

प्रवर्ततां प्रकृतिहिताय पार्थिवः ।
सरस्वती श्रुतिमहती महीयताम् ।।

(महाकविः कालिदासः)

प्रकाशकः—ऋष्यशृङ्गाश्रमः, रेसुङ्गा, गुल्मी
सङ्ख्याः—१२००
संस्करणम्:—प्रथमम्
प्रकाशनसमयः—२०४० वैशाखसंक्रान्तिः
प्राप्तिस्थानम्:—प्रजातन्त्रप्रणयिभ्यः परस्सहस्रेभ्यः
मूल्यम्:—रूप्यकत्रयम्

सर्वेऽधिकारा उपहर्तुरधीनाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(रचनाकालः २०३९ श्रावणी पूर्णिमा)

अश्रूपहारः

(अश्रुस्रव-निवापः, स्वर्गीय-जननायक-स्मृतौ)

नेपालभूमितनयोऽपि जगत्प्रतो नेता दलेन निषितोऽपि समस्तनूतः,
एकोऽप्यनेकजनहृद्गतभिन्नरूपो हा ! हन्त ! हन्त ! धरणीमधिभूर्व्यहासीत् !
दुर्दान्तरोगदलितोऽपि सदा स्मिताढ्यः कारास्थितोऽपिजनसंमतमान्यमन्त्री,
दुर्हृत् कुशासनधियोऽपि,सुहृज्जनानां हा ! हन्तः! हन्त ! धरणीमधिभूर्व्यहासीत्!
विक्रमप्रमाणहृदयैर्विदितोऽप्यरातिः प्रान्वेषयन् सरलराष्ट्रियमेलमार्गम्,
शश्वत्स्वराष्ट्रपरिरक्षण दत्तचेता हा ! हन्त ! हन्त ! धरणीमधिभूर्व्यहासीत् !
कुक्षिम्भरित्व-निजवाद-विलासवादै बह्वी समादरभरे प्रतिषेधितेऽपि,
स्वान्तासनं सबहुमानमधिष्ठितोऽसौ हा ! हन्त ! हन्त ! धरणीमधिभूर्व्यहासीत् !
क्रान्तिं वदन् चरमशाश्वतशान्तिकामः, संघर्षयन् परम-सत्यमहेश्वरार्थी,
आन्दोलयन जनसमाज सभाजनार्थी हा! हन्त ! हन्त ! धरणीमधिभूर्व्यहासीत् !

× × × ×

नवरामाभ्रनयने (२०३९) मिते वैक्रमहायने,
श्रावणी प्रतिपत् शुक्ला हा ! हन्त ! वज्रपातिनी !
महाकालमुखं घोरं हा ! यस्या रजनी मुखम्,
न्यगिलल् लोकनेतारं वीरं विश्वेश्वराभिधम् !
विश्वेश्वरप्रसादाख्यः कोइरालोपनामकः
नेपालतनुजो वीरो व्यक्तिस्वार्थोपरि स्थितः
जनाशाकेन्द्रबिन्दुस्थो हन्त ! विश्वेश्वरो गतः !
नेयं व्यक्तेर्गतिः किन्तु जनाशा निधनं गता !
दृश्यते साम्प्रतं चैकं निपतत् पार्थिवं वपुः,
परस्कोटिजनाकाङ्क्षाराशिरद्य निपित्सति !

कालो क्लन्दति ! रापती निपतति ! श्वेता विषाद्यते !
कृष्णा क्रन्दति ! कौशिकी विलपति ! म्लायत्यहो वाग्मती !

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रारा रौति ! समुच्छ्वसन्ति गिरयो ! नेपालभूर्मूर्च्छति !
नूनं सागरमस्तकोऽवनमयन् स्वोयं शिरो रोदिति !

× × × ×

हिमाद्रिसानुगः स्वर्भानुना ग्रस्तो दिनाधंगः
भानुरस्तं गतो हन्त ! प्रजातन्त्रात्मभानुभिः !
अहह ! हिमशैलस्थोऽस्तमितो लोकबान्धवः
आकुञ्चन् किल भूगोलात् समाजवाददीधितीः !
जिघासु र्दासताध्वान्तं प्राधिकाराप्तिदीप्तिभिः
निर्वाणो हा ! महादीपः, कार्यं शिष्टं यथातथम् !
राष्ट्रियता, प्रजातन्त्रम् समाजवाद इत्यदः
गुणत्रयं समापन्नो ऽन्तर्भूतो हा विराड् विभुः !
मार्गहीना दिशाहीना पितृभ्रातृविवर्जिता,
अनाथा विकलवा जाता नेपालजनता ऽधुना !

× × × ×

शिव ! शङ्कर ! विश्वनायक ! नयपालः परिपाल्यते त्वया !
नयनिर्णयनायकं कथं हरसे ते हर ! सेवनं वृथा !
जननाथ ! विपत्तिभञ्जक ! जननेता ह्रियते त्वया कथम् ?
गिरिजाप्रियनाम विश्रुत! गिरिजानामप्रियोऽस्ति किं भवान् ?
भव ! कृष्ण सुतोऽस्ति ते रिपुः किमतः कृष्णमिहासि रोदयन् ?
जनकोऽस्ति भवान् गणेशितु विलपन्त नु गणेशमीक्षते ?
नर एव हि तारकाः क्षितावथ ताराधिपशेखरो भवान्
न कथं परिरक्षसे प्रभो ! धृततारां जनवेंजयन्तिकाम् ?

× × ×

गणेशमानसिहेन प्रजातन्त्रविमर्शनम
सोढुमशक्नुवन् कच्चिद् गणेशोऽसुं न्यत्रयत् ?
अलं कृष्णेन राष्ट्रियचिन्तनेनेति चिन्तता
आहूतोऽसौ श्रीकृष्णेन गोलोकीयसभाश्रियै ?
"कृत विलिब्राण्टमुखै सदस्यैः समाजवादस्य सुविस्तरेण
इत्थंमतिदेवगुरुर्भवन्तमाहूतवान निर्जररम्य गोष्ठ्याम् ?
किंवा सुधावञ्चितदैत्यराजैः समाधिकारार्थमयाचि शुक्रः
स मार्गयन् व्यक्तिमपक्षपातां संप्राप्य बीपीमनयद् द्रुतं तम् ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्रह्मर्षि-राजर्षि सुरर्षि सेव्या वैवस्वतीयाऽस्ति सभा विशाला,
सेयं प्रजातन्त्र महर्षि-शून्या माभूदतोऽनीयत वीरवीपी.
मूलाधिकारापहृताश्वमङ्काद् अच्छेद्यशिष्टेः शमनस्य दूतैः
दुर्यात्यमानस्य घृणार्ह-दृश्य प्रदर्शिनी निर्ऋतिराह्वयत्तम् ?
"अध्येषिराणा-प्रभुतावसाने संमानयिष्याम उदर्कसन्धिम्.
निःशेषतोऽपूरि न वा स ?" एतत् पिपृच्छिषू राष्ट्रपिताऽऽह्वयत्तम् !
इन्द्रस्य राज्यं नु दृढं विशालं सूर्यास्तहीनं, त्रिदशाश्च दासाः,
विरोधयन्नौपनिवेशिकत्वं विश्वेश्वरं मन्त्रयते स्म गान्धी ?
किंवा विवादे दिवि राजनीतौ दिवौकसां न्याय्यविधौ विमूढः
विश्वेश्वरं प्राह्वत लोकनेता जयप्रकाशो जननायकं द्राक् ?

× × ×

स्निग्धो दायी (सान्दाजु) राष्ट्रभक्तानुजानां, स्निग्धं मित्रं भूभृतां नायकानाम्
नैपालानां नायक सर्वमान्यो हा ! हा ! हन्त ! प्रस्थितो नः पुरस्तः !
गेहे गेहे मण्डले मण्डले च द्वीपे द्वीपे सर्वदेशान्तरेषु
रोरुद्यन्ते मानवाः शोकमग्नाः स्वर्गं याते वीरविश्वेश्वरेऽद्य !

पार्वत्या सहित एकः क्रन्दति (आह्वयति) चन्द्रशेखरः,
पर्वतीयं हिंतैरन्यः क्रन्दति (रोदिति) चन्द्रशेखरः !

× × ×

सिद्धान्त निष्ठादिगुणैर्महद्भि विरोधिनाञ्चापि जयन् मनांसि
असंशयं राष्ट्रविभूतिरेषा, राष्ट्रीयनेता खलु निर्विवादः ।
देशे विदेशेऽपिच वक्तृतायाम् "अहं मम" त्यादि पदप्रयोगैः
तत्प्रातिनिध्यं द्रढितं चिराय प्रोद्भासिता राष्ट्रियनेतृता च ।
'राणाधीनं शासनं लोपनीयम् लोकाधीनं शासनं स्थापनीयम्'
संघर्षेऽस्मिन्नूढनेतृत्वभारो राणासत्तामाच्छिनद् वीरवीपीः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यदा प्रजातन्त्रपरं विधानकं निरोधयन्त्योऽधिनयार्थिभावनाः
अबन्धनं तत्त्वमवीवृधन, तदा जनाश्रितोऽभूदयमेकनायकः ।
विधौ प्रजातन्त्रमुखे विनिर्मिते निचायने सर्वजनीन आदिमे
विधानतः सर्वजनैः समर्पितं प्रधानमन्त्रीति पदं स चाग्रहीत् ।
ततोऽद्ययावद् जनता निरन्तर प्रधानमन्त्रित्ववहं स्वनायकम्
अवैति विश्वेश्वरमेककं हृदा न भूतपूर्वेति कदापि चिन्तति ।
कारावासप्राणदण्डादिवार्ता बीपीबाबूं न स्म संत्रासमन्तिः
कारातोऽसावप्रतीकारं गं स्वीकृत्यायात् स्वर्गलोकं सधैर्यः

× × ×

टिटोक्रुश्चेव-माओत्सेतुङ्ग-नेहरू - गान्धिनः
बाबूजयप्रकाशश्च बीपीबाबूसमाः स्मृताः ।
"अयं नेपालजो गान्धी, एशियाद्वीपलेनिनः"
परितः श्रूयते चैवं पत्रिकासु प्रकाश्यते ।
आदर्शराजतन्त्रान्तः प्रजातन्त्रप्रकल्पने
विदग्धोऽयं बीपीबाबूर्वसिष्ठ एव साम्प्रतम् ।
मुक्तये मुनयः पूर्वे तेपिरे कठिनं तपः,
अतप्यत तपो बीपीः क्रूरतन्त्राद् विमुक्तये ।
दृश्यते साधनामुष्य प्रजातन्त्र-महर्षिता,
तथा गृहस्थ एवायं विदेह इव योगिराट् ।
प्राचीनास्ते महितमहसो-याज्ञवल्क्यो, विदेहः,
सोता, गार्गी हरितमहिषी, गौतमो भागुरिश्च,
एतद् भूमौ विदितचरिता राष्ट्रभूति-स्वरूपाः ।
अद्यत्वे चानुपममहिमा वीरबीपोर्विभूतिः ।

× × ×

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विश्वेश्वरो लोकप्रियोयदाऽभूत् प्रधानमन्त्रीतिपदं दधानः।
तदा प्रजातन्त्रविचारधारा प्रवाहिता सर्वत एव देशे।
"अयं हि लोकप्रियतामुपार्जयन् यशस्वितां लिप्सति विश्वमण्डले।"
अतः प्रजातन्त्रशिशुर्मनोहरो निषूदितो न्यूनवयाः समद्वयात्।
समे सविश्वेश्वरमन्त्रिणस्ते बन्दीकृता द्राक्, क्रथिता च संसद्,
अभूतपूर्वा चलिता प्रणाली सा निर्दला नाम नवा विचित्रा।
यदा स कारावनाद् विमुक्तः प्रचालितां पञ्चमुखी प्रणालीम्
पृष्टः प्रजातन्त्रप्रियैः स्वनेता प्रावोचदेवं स्वविचारजातम्।
"व्यवस्थया नेतृजनस्य मार्गणे समास्थिता नैकविचारधारिणः।
दलीयधारा द्विविधा विभाजिता, दलेन हीनातु पृथक् स्वतन्त्रदृक्।
देशस्य सर्वोच्चविधायिकायां दलीयधाराऽस्ति नगण्यसंख्या,
गृह्णाति भागं दलमुक्तधारा यथार्थपञ्चत्वमुपैति चासौ।
प्रयोजनं निर्दलराजनीत्या न चात्र किञ्चिद् दलबन्धनानाम्।
ये निर्दलीया अतिभिन्नचिन्ता एकत्वमेषां शशशृङ्गतुल्यम्।
तस्माद् विभिन्नैर्मतिभिः समेता रेलस्य कोष्ठस्थ-समूहतुल्या
वैयक्तिकस्वार्थपरा विकार्णा विधायिका राजनयेन शून्या।
विशेषतेयं दलमुक्तपक्षतौ-न नेतृता ज्ञाप्यनुशासनं दृढम्,
परस्परं संमतिसंहतौ न वा विधायिका केवलयात्रिवाहिनी।
सिद्धान्तसूत्राग्रथिता प्रणाली विकीर्णपुष्पा न तुमाल्यरूपा,
मालार्थिलोकाय न रोचते सा व्यस्ता विरूपा विकला विभिन्ना।

सिद्धान्त-नेतृत्व-विहीनपक्षा लोकैरनिर्वाचितनिर्दलीयाः
व्याचक्षते राज-समाजनीतौ अहो जनेपूत्तरदायिनस्ते ?
मताधिकारेण जनाः प्रवञ्चिता विधायका व्यक्तिपरा विलासिनः,
इयं व्यवस्था टिकिताऽभिभाषणं सुरालये कुक्कुटसूकरादिके।
अलब्धनीतिर्विकृतानुशासनो विधायकः कल्पितदेवरूपकः
समादृतो ग्राम्यजनैः हविष्कृत-सुधासुराकुक्कुटमांसतर्पितः।
विधायकैर्मन्त्रिमहोदयाः समं सुरालयस्था अभिलाषुका हविः
विधायिकाऽनुत्तरदायिभावना-निरङ्कुशा औदरिका विलासिनः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विधायिकाया न जनेषु संगतिः परस्परं नैतिकमार्गमार्गणे,
अतो महापञ्चसदस्यसंहति-निजत्व-पार्थक्य-परायणा भृशम्'।
कोदृङ् नयो निर्दलपद्धतीयो ? नीति विना राजनयश्च कीदृक् ?
क्षेत्रं विना कुत्र कृषिर्विधेया ? भाषां विना काव्यकृति हि कुत्र ?
इयं व्यवस्था दलमुक्तमार्गा, नेतृत्व-हीना जनमुक्तमार्गा.
नवा विचित्रा नयमुक्तमार्गा, स्वव्यक्तिवादस्य विकासशीला।
अराजनीतिश्च सुराजनीतिका कृता महापञ्चविचित्रभाषणैः,
पिबन्तु, खादन्तु, धरन्तु भाषणं, स्वपन्तु, गच्छन्तु च भाषणे जनाः।"

× × ×

कारावासे प्रतिनिधिगणे यातनायां निबद्धे
लोकादृत्ये जनपरिवृढे वीरविश्वेश्वरेऽपि
त्यागोद्दीप्ताः परिचितजना नीतिविज्ञाः प्रबुद्धाः
शिक्षां प्राप्ता वचनपटवो राजनीत्या विरक्ताः।
शिक्षाहीनो धनिजनगणो वञ्चना-पूर्णचेता
लोकारातिर्नविदितनयो लोलुभो दाम्भिकाढ्यः
भागं गृह्णन्नधिकृतपदो मन्त्रितायां विधौ च
शीघ्रं तावद् धनिषु गणन माप्तवानेष धर्मः।
सर्वान् पञ्चान् धनविषयिणो चिन्तनाऽक्षोभयत् स्राक्
प्राज्ये राशावहमहमिका रूप्यकाणां प्रवृद्धा,
दृष्टाः पीना धनपरिवृढाः "कार" यानाधिरूढा
दृष्टा दीना जनपरिवृढाः कारया धार्यमाणाः।
एवं सर्वे धनहृदयिनो वञ्चकाः पञ्चवर्गा
गालीमेकामभिमतफलाधायिनीं मन्यमाना
मान्यं लोकप्रियमधिभुवं वीर-विश्वेश्वरं तं
गालीं दत्त्वाऽधिकृतवचनै र्हृद्भिरस्तौषुरित्थम्।--
"क्रीणे पञ्चशतैरद्य प्रियायै शाटिकामहम्,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तुभ्यं गालिप्रदानेन विश्वेश्वर ! नमोऽस्तु ते ।
इस्लामावाद–पेकिङ्ग–कोलम्बो–पेरिसादयः
वाशिङ्गटन–रंगून–बोन–न्यूयार्क–लन्दनाः
मास्को–बर्लिन–दिल्यश्च नगर्यः ख्यातनामिकाः,
भ्रमयामि प्रियां यासु 'मान्त्रणी' पद गर्विणीम्,
तुभ्यं गालिप्रदानेन विश्वेश्वर ! नमोऽस्तुते ।
प्रतिमा देवतादीनां निष्काश्य प्राक्तनास्तथा
अर्जये डलरं प्राज्यं गंजकस्तूरिकादिकम्
विक्रीय देशजं वस्तु प्रतिषिद्धं न किं भवेत् ।
तुभ्यं गालिप्रदानेन विश्वेश्वर ! नमोऽस्तु ते ।
पर्वते मध्यदेशे च तथैव काष्ठमण्डपे
स्वालया निर्मिता भव्या, भाग्यवानस्मि साम्प्रतम्,
तुभ्यं गालिप्रदानेन विश्वेश्वर ! नमोऽस्तु ते ।
अमेरिकादिदेशेषु विश्वविद्यालयेषु मे
पुत्रा अधीयते सम्यग् मन्त्रिपुत्राभिमानिनः,
तुभ्य गालिप्रदानेन विश्वेश्वर ! नमोऽस्तु ते ।
'कार्पेट काण्ड' धर्मेषु भ्रष्टाचारेषु दोषवान्
निन्दनात् ते विशुद्धोऽस्मि विश्वेश्वर ! नमोऽस्तु ते ।
यदा रुग्णो भवान् पारपत्रं याचितवान्, तदा
नदत्तं सर्वकारेण गृह्णानो भारताद् भवान्
अमेरिकां गतः, सर्वे वयं तु पञ्चनायकाः
भारतं प्रति चाक्रोशं भवन्तं प्रति भर्त्सनाम्
देशव्यापकरूपेण कृत्वा साकल्यमाप्नुम,
द्रढित च पदं स्वीयं विश्वेश्वर ! नमोऽस्तु ते ।
एशियायां सुविख्यातो राणाकाले विनिर्मितः
परस्सहस्रकोष्ठाढ्यः सिंहप्रासादनामकः
हिमालयीयदेशस्यालङ्कारो मनमोहनः
प्राकृतहिमश्रृंगाणां प्रतिस्पर्द्धाभिमानवान्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

साम्बः पशुपतिर्देवः पश्यन् यं स्मयते प्रभुः ।
प्राङ्गणे हिमशैलस्य क्रीडमानाः सुरापुराः
ध्रुवं नृत्यन्ति मुग्धास्ते दृष्ट्वा मानव-शिल्पकम्,
अमूल्य-निधिरूपोऽयं नेपालस्य महामणिः
अगण्यां सम्पदं धृत्वा राजमानः सगौरवम्
ऐतिहासिक-सन्ध्यादिलेख्यसामग्रीकं च तम्
परोऽबुंदरूप्यकाणां भ्रष्टाचारे कृते सति
दाहयित्वापि शुद्धाः स्मो दाहका अद्भुतं न हि
तुभ्यं गालिप्रदानस्य फलं शेषोऽपि वेत्ति किम् ?
जागर्ति स्खलनाशङ्का यदा पञ्चपदस्य हि,
लब्धुं तादृक्पदं भूयो द्वितयम् अवशिष्यते,-
१-उच्चैः स्तुतिर्व्यवस्थाया २-आक्रोशव्यञ्जनं त्वयि ।
एवं निर्वाहितः पन्थाः शरणं केवलो भवान !
नाम्ना देशविकासस्य परिवारविकासकाः
तुन्दिलाः स्मः सपत्नीकाः सहर्षाः स्वार्थसाधकाः
राष्ट्रं गतं निपात्यापि धनं राज्यमुपार्जितम्
शतकृत्वेऽपराधेऽपि विशुद्धाः स्मः क्षणात् प्रभो !
दुर्ज्ञेयो महिमा ते ऽत्र, तुभ्यं गालिप्रदा वयम् ।"

× × ×

निजवादशिरोऽर्तिमावहन् जननेता निहितोऽस्ति बन्धने,
जनतन्त्रविचारभावना-महिमानो विकसन्ति चान्वहम्,
पुरुषो बिपिरस्ति नैककः, विधिना स्वीकृत एकनायकः
सुकृतैः सुखितोऽमुना जनो ग्रहवारो रविणा यथा करैः ।
तिमिरं दशदिक्षु लोकयन् विकलश्चाथ बृहत्समस्यया,
सरणिं सुगवेषयन् द्रुतं निजवादोऽररचत् सुयोजनाम् ।--
"बीपीवादे वर्तमानास्तदीया भूते भव्ये तद्दलं संश्रयन्तः
लेखात् काव्याद् भाषणाद् वान्यमार्गाद् लोकादृत्यं शासनं कल्पमानाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

छात्रा वास्युः शिक्षका वा भवेयुर्नेतारो वा सर्वकारीयकार्याः—
ये के ऽपिस्युर्यत्र कुत्रापि वा स्युस्ताड्या दण्ड्या लुण्ठनीया - विनाश्याः ।"
मण्डले मण्डले ग्रामे ग्रामे च कृतयोजनः
निजवादो व्यवस्थाम्बां कृतवान् सिंहवाहिनीम ।
"भगवत्या कृतं सर्वं न किञ्चिदवशिष्यते ।"
इति सप्तशती-सूक्तिश्चरितार्थीकृता यथा ।—
देशभक्तान् महाभागान् धर्षितुं विनियोजितः
पालितः कोटिशो मुद्रा व्ययीकृत्य निरर्गलः
राष्ट्रे देशे समाजे च प्रजातन्त्रे धराधिपे
येषामनुपमा भक्तिस्तानाक्रमितुमुद्यतः
लोकतन्त्रप्रभून् नेतॄन् राष्ट्रभक्तान् जनप्रियान्
अराष्ट्रियान् भाषमाणो गर्जन्नाधूतकेशरः
शिरांस्याक्रम्य सन्तुष्टः प्रशासनाधिकारिणाम्
विधेश्च संविधानस्य चोपरिष्टात् प्रतिष्ठितः
स्वच्छन्दश्च स्वतन्त्रश्च स्वेच्छाविहरणप्रभुः
अनियंत्रैव देयानि भुञ्जानो भोजनालये
देशस्य सर्वभागेषु विहरन मोटरादिभिः
अनियंत्रितनिर्यात्यो दुर्दान्तो ऽमितगर्ववान्
कन्यानां वा सतीनां वा चारित्रं दूषयन् तथा
कृषकानापणिकान् वा श्रमिकान् छात्रसंहतिम्
शिक्षकान् लेखकान पत्रकारान भीषयितुं रतः
लुण्टाको भीषणः क्रूरो ज्वलदनलसन्निभः
जिल्लाधिकारिणामञ्चलाधीशानां च मन्त्रिणाम्
पञ्चानां सचिवादीनाममोघास्त्रायितः सदा
प्रादुर्भावितविस्फोटो निर्दोषान् धातुकोऽदयः
भञ्जयन् शान्तिसन्दोहं शान्तिक्षेत्रे हिमालये
विलक्षणस्वभावो ऽभूद व्यवस्था देवीवाहनः

× × × ×

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तस्यां प्रणाल्यां निहितं नगण्यं तत्वं प्रजातन्त्रमयं निहन्तुम्
समूलघातं विहिते प्रयासे विलक्षणाऽरच्यत नाट्यशाला ।–

कदाचित् संविधानेन ग्रामप्रतिनिवर्तिनी
प्रणाल्याश्च सपत्नीव पर्यणीयत सुन्दरी ।
तदाप्रभृति रुग्णा सा प्रणाली दुर्दिनाहता
नितरां पीड़िता जाता भुञ्जाना कर्मणः फलम्
सपत्न्या धर्षणैर्दुःखै र्दुर्बला रूदती सती
विरूपिता विलपन्ती मुमूर्षुरिव लक्षिता ।
वरिष्ठा आत्मजाः सर्वे सपत्न्या धृतकेशकाः
वशीभूताश्च ते सर्वे एयपोर्ट समागताः
विश्वेश्वरविरोधाय सन्नद्धाः पिण्डलोलुपाः ।
पोखरायां विराटे च नगरे काष्ठमण्डपे
विश्वेश्वरविरोधार्थं कर्तुं च पञ्चरेलिकाम
अवीवहन् विकासार्थमुद्राणां कोटिशो नदीः ।
विकृता भीषणा क्रूरा ग्रामप्रतिनिवर्तिनी
क्रयविक्रयसस्थानं राजनीतेरभूदहो !

इत्थं प्रजातन्त्रभ्रमाथिनीयं प्रजाविरोधेन पुरोभ्रमन्ती
व्यापार–वक्तृत्व–गृहीतभेदा द्वेधा ऽपसर्पन्त्यचलद् द्विवक्त्रा ।

पदारूढो महापञ्चोऽवदद् यां निर्विकल्पिकाम्
भुक्त दुष्परिणामोऽसौ तीव्रं तां भर्त्सते पुनः
लब्धानुमोदनैः पञ्चै र्दृश्यते लोकतान्त्रिकी,
'गाउँफर्क' परित्यक्तं दृश्यते ऽलोकतान्त्रिकी ।
भ्रमन्मञ्चस्थितानां या धेनुरूपा पयस्विनी
तादृङ्मञ्चच्युतानां सा गर्दभी कुत्सिताकृतिः ।

× × ×

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सामन्तवाद-परिपोषणमात्रचिन्ता दासत्ववृत्ति-चिरसंस्कृतिबद्धचित्ताः आद्यूनतैकमतयः सरकारवाहा वैरायकाः सकलनागरिकैः स्वदेशे राज्यप्रशासनमयागसि वध्यतायां संकल्पितं विदधतो निजवादपुष्टाः सप्ताभियोगपरिकल्पनदुश्छलेन कोटिप्रजापरिवृढं निगृहीतवन्तः।

न्यायाधिकरणम् एकपुरुषम् एकपूरूषम्
विश्वेश्वरं महीयांसं निरागसमजूघुषत्।
न्यायाधिकरणस्याग्रे जननेत्रा महात्मना
उदीरितेषु वर्ण्येषु कश्चिदंशो निदर्श्यते ।-
"संघर्षश्चालितोऽस्माभी राणातन्त्रविरोधिभिः
मानवीयाधिकाराणां मूलानामुपलब्धये
उपभोगो भवेद्येषां समानो नृपलोकयोः।
"शासने संविधाने च स्वामित्वमुभयोः समम्"
इति संविदभूद् राणासत्तान्ते जनताग्रतः।

कारालये बन्धनहेतुरासीदेको ऽपराधो मम तावदेषः,
निर्वाचने नेतृतया जना मे प्रधानमन्त्रित्वमुपाहरन् यत्।

न कदाचन हिंसायां विश्वसिमीति मामकम्
सिद्धान्तमनुगच्छन्तो मत्समूहं समाश्रिताः
हिंसायां निरताश्चेत् ते न मयाऽनुमतास्तथा,
स्वीकुर्वे केवलान्तत्र नैतिकोत्तर-दायिताम्,
यतस्तेषामहं नेता, मामका एव ते समे।

न जनपरवती कदाचन स्याद् विशसन-शोषणमूलिका प्रणाली इयमपि जनपक्षिणीति वक्त्रा ननु सुरभीक्रियतां खरोऽभिषेकैः।"

× × ×

चिराय राणापरिवारतन्त्रमुच्छेत्तुकामां जनतां विनीय
ऊर्जस्वलः क्रान्तिचणः पुरोगो विश्वेश्वरः प्रैरयदेककोऽहो!
दिवंगते तादृशि वीरपुरुषे दिनैकमात्रं यदि शासनेन चेत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न नम्यते राष्ट्रियवैजयन्तिकाः कृतं प्रजातन्त्रदिवामहोत्सवैः ! स्वकीयनेतुः शवयात्रयोत्सुकोच्छलज्जन-व्रात-समुद्रवीचिषु निराकृती मीलितलोचनो विधि र्गतत्रपो नाङ्कति राष्ट्रियां शुचम् । शवे चतुस्तारपताकयावृते स्फुरच्चतुस्तारपताकयानगे समप्यं लक्षाधिकपुरुषाः शुचाऽन्तिमाञ्जलिं तृप्तिमवाप्नुवम् पराम् अभूतपूर्वो जनतार्णवोऽभूत् कस्यापि पुंसः शवदर्शनार्थी, नेतुर्जनानांच परस्परस्थः संबन्ध ईदृक् प्रथमोऽत्र देशे ।

नेपालीये प्रथमपुरुषो राजनीतीतिहासे
नैपालानां सुहृदयवतामाद्यविश्वासपात्रम्
बुद्धादर्वागिह विलसितः शीलसौजन्यमूर्ति-
र्वीरो बोपीनंयविनयभू र्जानकीजानितुल्यः ।

गीर्वाणवाग्विद् कुलचन्द्र एको, लक्ष्मीप्रसादो जनवाग्विदेकः, विश्वेश्वरो राजनयज्ञ एकः, कंबि कंवि नायकमाहुरेतान् : यथा जरा-रुग्-निधनाद् विमुक्तये, तपश्चरन् गौतम आप बुद्धताम, कुनीति-दासत्व-विमुक्तये तथा तपश्चरन् बोपिरदीपि सन्ततम् ।

× × ×

वक्तव्ये भाषणे वार्तालापे वर्ण्ये यदा कदा
उक्तासु तत्रभवता द्वित्रा वाणीनिदर्शये ।-
प्रजातन्त्रराजतन्त्रे अन्योन्याश्रयजीविते
स्मर्तव्यं सर्वदाऽस्माकं 'राजतन्त्रं महीयताम्" ।
"लभ्यन्ते संसदा यावद् अधिकारा न भूरिशः
राष्ट्रियता-प्रजातन्त्रे न तावद् बलवत्तरे ।"
"येषां कृते प्रजातन्त्र विषं भवति दुःसहम.
प्रजातन्त्रार्थसंघर्षम् 'अराष्ट्रियम् वदन्ति ते ।"
':पर्येष्या परिचेया च परिवृत्ता परिस्थितिः
नेदयन्ती प्रतीयेत प्रजातन्त्रात्मपद्धतिम् ।',

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

"प्रजातन्त्रीयसिद्धान्ताद् जनमानसभावनात्
महनीयतमादर्शाद् दविष्ठा पञ्चपद्धतिः।"

"प्रातीपिके किल कलाकृति–राजनीतौ, क्रीता कला विकुरुतेच्छन्नीतिमद्भिः, अस्पृष्ट एव नयचालकदासवृत्या, साहित्यिकोऽङ्कुतु समाजगतां प्रवृत्तिम्।"

महासाहसिकोक्ति वा वध्योपग्रहवाक्तिः
न्यायालयपुरो वर्ण्या मदीया समधीयताम्।'

"न्यायाधीशो न्यायमामर्दयेच्चेत् को मर्यादां स्थापयेत्तस्य सम्यक्? दुष्यन्त्यापो यर्हि गंगोत्तराद्रौ गङ्गापाथः कुत्र पीयेत पूतम्?

"समर्पितो ऽस्मि देशस्य राष्ट्रीकरणलिप्सया,
प्रेरणा मूलभूतेयं राजनीतिकजीवने।"
"क्रान्ति में रोचते, यस्या लक्ष्यभूता सुपद्धतिः।"
नातङ्को रोचते, यस्य लक्ष्यभूतो हि पूरूषः।"
"स्वादर्शस्येतिहासस्य पुरो न्यायालयस्य च
जनतायाश्च दृष्टौ स्वं निर्दोषं वेद्मि पूर्णतः।"

× × ×

यस्यावमान्नन–विनिन्दनलक्ष्यसिद्धौ द्वाविंशतिं हि शरदां रचिते विधाने वीतानि राष्ट्रिय–परोऽर्बुदरूप्यकाणि, सोऽयं महापुरूष ईश्वरतामुपेतः! यस्योग्रवंरपरिदर्शनयोजनार्थे कालध्वजोद्धुवन इष्टधनैर्नियुक्ताः जात्मा जना निसमरुन्धत यद् विमानं, वैमानिकः स इत इन्द्रपुरं प्रयातः! "कं निन्दयन् परिजनं परिपालयेयम्? कं भर्त्सयन् प्रचुरनोटमुपार्जयेय:" इत्थं विषीदति, सुदुःख्यति पञ्चपाशो यन्नाशनः, स पुरुषो व्यजहादनाथान्! यो राजनीतिनिपुणो विधिविद्वरेण्यो विश्वप्रवावपटुतमोऽमरगीःसुदक्षः, आख्यायिकारचनया जनवाचिभूयः ख्यातिगतः, स पुरुषो विरतो नितान्तम्! यं देष्टिका नियतिवादिनमाहुरन्ये भूतत्ववादपरिशीलिनमुद्गिरन्ति, अध्यात्मवादिनमथाहुरतीतमाना, अज्ञात एव सभवान् दृगगोचरो ऽभूत्! आश्लिष्य नैकमरणानि पुनर्मृतो, यो मृत्वापि जीवति यदीयविचारजातम् "चक्रारपङ्क्तिरिव जीवनमृत्युपङ्क्तिः" सोऽयं सुकीर्तिवपुरद्य जहाति मृत्साम्!

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बन्दीकृते मयि जनेषु बलात् प्रवाह्ये वैदेशिकानुकृति-नायित-नायतन्त्रे
दासत्व-संज्ञपित-सत्वबलाभिमाना नेपालजा" इति विवेकवतो न सत्त्वम् !

"आमेरिकाभिनवशिक्षणपद्धतीद्धा फार्मोसभूमिसुधरा नशिरीयवर्गा
नेजाप्तिनोतिनटिका नरिनर्तनोया, किं मौलिकम्?" निगदतः प्रविभातिकीर्तिः

"विस्मृत्य वैरविषयं तदतीतजातं संमेलमेलकनये मिलिता भवेम
राष्ट्रस्य संकटघटी" ति विवेकवान् यः तत्राणसकटघटो झटितिप्रपन्ना ?

राष्ट्रान्तरीयगमनागमनप्रसङ्गे विश्लेषमेलकपरैर्हि परस्परापैः
संवादितो बहु विमानचरस्थले यः समानितश्चरमयाञ्जलिमालया सः !

उद्दान-पीडन-निकार-पराभियोगान् आपादितो ऽप्यतिमहोमहनीयमूर्तिः
यो मानवीय-महिमानममानयत्, स आरादितोऽमरपुरीचरगोचरोऽभूत् !

"किञ्चित् कृतं ननुभवेद् जनतन्त्रलाभे ? सर्वं वयो न लगितं करणीयबोधे ?
स्याद् भावि-सन्ततिपुरः स्मृतिरस्फुटा मे ?" प्रत्यालपन्नधिपतिः
स्मृतिगोचरोऽभूत् !

"यावन्न कोटिधरणी जनतन्त्रपूता, तावद्ध्रिये नयचणाननुजान् प्रपश्यन्,
नंष्टास्मि कार्यसफलीभवने, तदा मे स्यात् पारलौकिकविधिः" कथयन्
गतो ऽस्तम् !

"ब्रह्माण्डसृष्टि-तदनन्तविभूतिरूपैरान्दोल्यमानहृदुदञ्चदवर्ण्यभावः
ईशास्तिबोधमनुभावयतेऽञ्जसामा"मेवं वदन् स सहसा समुपेत ईशम् !

× × ×

विप्लवो यत्र तत्रास्ति बज्रपातमयी मही,
क्रन्दामः सहसा हन्त ! विक्षिप्तेनेव चेतसा !

हिमसंहति-भूमिराजिता, प्रथमे नेमुनिपालिता युगे,
गिरिराजसुतामनः प्रिया, त्रिदशैर्नित्यमधिष्ठिता, तथा
सुरगायकगीतगुञ्जिता ऽप्सरसां नृत्य-कटाक्ष-मञ्जुला
सनकादिमहर्षिसंस्तुता, बहुराजर्षि-सुरर्षि सेविता,
अथ भारत-चीन-मध्यगाऽऽसितमामेचि च विस्तृतिं गता,
विवदत्परिपाटिका जना मिलिता यत्र समानशासने,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रमथेन गणेन नृत्यता पशुपो यत्र विराजते प्रभुः,
अमरोपवनायिताऽप्यहो ! वसुधा रोदिति शोकमालिनी !
तुहिनाचलभृङ्गमालिका उषसि द्राग् विपदाप्तिसूचिकाः
हिमनिर्झरिणी व्यरूरुपन् रुधिरप्रायतुषारवर्षणैः !
वत मध्यदिने मलीमसं शिथिलस्पर्शि-मयूखमालिनम्
सहसा व्यवधाय वर्धिता घनमाला सतडिद् भयावहा !
परितः प्रसृता तमस्तति र्दिवसो वा रजनीत्यनिश्चितिः
लयकारकघोरहुङ्कृतिः शिव ! हाहेति विलाप-चीत्कृतिः !
स्तनितं चट चट् चटत्कृतं, पतितं पट् पट पट् पटायितम्,
हिमपातनिपीडनैः सहाशनिपातस्य प्रचण्डताडनम् !
वृषभाः कुकुरा विडालकाः पुरमार्गाश्रयिणोऽप्यकिञ्चनाः
कटुजाड्यनितान्तकुट्टिता.कृमिमारं हि मृता इतस्ततः !
दिवसे दिवसे द्रवद्हृदोऽपरिहार्य-प्रकृति-प्रकोपतः
विलपन्ति चराचरात्मिकां रुदतीं वीक्ष्य धरां नु सूरयः ।--
"अयि राष्ट्रियजन्तुघोषिते ! सुरभे ! रोदिषि हा विपत्तिगा !
अपि राष्ट्रविपन्नतर्दिता विगता राष्ट्रियता त्वयि स्थिता ?
अयि राष्ट्रशकुन्त ! डम्फक! किमितो नोत्पतितुं प्रवर्तसे ?
किमु राष्ट्रविपत्तिपीडितौ तव पक्षौ विकलौ नु साम्प्रतम् ?
अयि राष्ट्रियवैजयन्तिके ? रविचन्द्राङ्कितशोभने ! शुभे !
किमु देवि ! न लक्ष्यते त्वयि मुदमुद्भावयदद्य नर्तनम् ?
गुरुवासित ! राष्ट्रपुष्पक ! तव शोभा विलयं प्रयास्यति ?
हिमपातनिपातिते द्रुमे कुसुमोत्पत्तिरहिश्रवायिता ?
अयि राष्ट्रिय-रङ्ग ! सिम्रिक ! तव सौन्दर्यमहो विनाशितम !
हरणं हननं बलात्कृतिरबलानां यदि चेत् क्व तेऽस्तिता ?"
चिक्रीषु र्दलवादि-राजनयिकान् तालार्थिनी सर्वतो
देशप्रेमिव-पुर्हरिद्वन-परोवृन्द प्रमुद्रादिभिः
क्रीता निर्दलनर्तको नरवृत्तिव्याजेन नर्नर्त्ति सा !
सत्यार्थी जनतन्त्रनीतिविदुरो दूरो ऽस्ति हा ! दुर्विधिम् !

× × × ×

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यातो राष्ट्र-प्रघट-रचना-शिल्पिपालः कुलालः !
सोरस्ताडं विलपति प्रजातन्त्र-बालो विवालः !
निर्विद्वेष-प्रमिलित-नयः पाशितो जालमालः !
साम्राज्यस्यं निजिगलिषति ध्वस्ततालो विचालः !

नैरन्तर्यं जगति विदितः कान्तशान्तो विशालः
ह्रयोतद्दीप्ति र्मलिन इव हा !! भाति नेपालभालः !
प्राणिव्रातापहरणरणच्चण्डचञ्चत्कपालः
सर्वाः संस्था ग्रसति सहसाक्रम्य कालः करालः !

× × ×

नाम्नः कर्मणि वंशवृद्धिवचनैः प्राकार्यचूडामणिः
संसारस्थ - समाजवादि – विबुध प्राचार्यचूडामणिः
ह्रासत्वाख्यतमिस्रनाशनमहाक्रान्त्यर्थिचूडामणिः
स्वर्यातः शिववल्लभो विजयते शान्त्यर्थिचूडामणिः !

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुद्रकः-सिंह प्रिन्टर्स, हजारीपुर :: गोरखपुर।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu